# Shri Minakshi Panchadashi Stotram

# श्रीमीनाक्षी पञ्चदशी स्तोत्रम्

## Document Information

Text title : Shri Minakshi Panchadashi Stotram

File name : mInAkShIpanchadashIstotram.itx

Category : devii, devI, dashamahAvidyA, mInAkShI, panchadashI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : panchadashIstavarAjamAlikA compiled by Lalitha Ramani

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 1, 2023

*sanskritdocuments.org*

# श्रीमीनाक्षी पञ्चदशी स्तोत्रम्

श्रीगणेशाय नमः ।
ॐ क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं श्रीं ।

कस्मात्पर्वतराजराजतनये त्वत्पादपद्मे न तं
दीनं मां समुपेक्षसे मम दृशोः भानं कुतो लुप्यते ।
को वा त्वच्चरणारविन्दभजनं कुर्वन् कृती भूतले
दारिद्र्यं लभते कथं च जननी दृष्ट्या विहीनो भवेत् ॥ १॥

एवं पाण्ड्यनृपात्मजेति भुवने को वा जगन्मात रं
स्तोतुं त्वां निपुणो महेश्वरी शिवे नाहं समर्थस्ततः ।
एतन्न्याय्यमिति त्वमेव मनसा निश्चित्य सङ्गृह्य मां
चक्षुष्मन्तमथाढ्यमाशुकुरुषे यद्यम्ब माता मम ॥ २॥

ईशात्वं सकलार्थ दान निपुणा कर्मानुसारान्नृणां
पूर्वं त्वं बहुपाप कर्म कृतवान् एतत्फलं भुज्यताम् ।
ईशित्रीति तवाम्बिके भगवति नामार्थशून्यं भवेत्
त्वद्भक्तैः कृतकार्यमत्र सकलं नोचेत्तवाराधनम् ॥ ३॥

लक्ष्मीं क्षीरसमुद्रराजतनयां त्वद्भक्तगेहे स्थिरां
कर्तुं शक्तिरहो तवास्ति जननि गेहे परं मे कुतः ।
लक्ष्मीस्थापन मुख्यकार्य विमुका त्वं भासि सर्वेश्वरी
लक्ष्मीं स्थापय शीघ्रमेव भवती चक्षूच्च सन्देहि मे ॥ ४॥

ह्रीङ्कारार्णव कौस्तुभां भगवतीं श्रीपाण्ड्यराजात्मजां
भक्तत्राण परायणां हरिहरब्रह्मादिवन्द्यां शिवाम् ।
ह्रीम्मध्यां त्रिदशेश्वरीं त्रिनयनश्रीतुल्य सौभाग्यदां
वन्देहं मम दृष्टिदोष तमसां भेत्रीं परामम्बिकाम् ॥ ५॥

हत्वा शुम्भनिशुम्भमुख्यदितिजान् देवेप्सितार्थप्रद

दुर्गा मामकचक्षुषः तिमिरमप्यद्याऽशु विध्वंसयेत् ।
हत्वा चाक्षुषदोषमद्यजननी मां पालयेत् बालकं
तां नित्यं प्रणतोस्म्यहं विनयतः सेवे जगत्पालिनीम् ॥ ६॥

सर्वेशीं निजभक्तकल्पलतिकां कामेश्वरीं कामदां
सर्वज्ञां सदसद्विलक्षण जगत्सत्ताप्रदां शाश्वतीम् ।
सत्यज्ञान सुखात्मिकां भगवतीं मायामयीं मोहिनीं
वन्देऽहं मधुरेश्वरीं नयनयोः दिव्यप्रकाशाप्तये ॥ ७॥

कस्त्वं किं फलमिच्छसीति जननीप्रश्ने नकश्चिच्छिवे
वक्तुं त्वां निपुणः त्वमेव चतुरा ज्ञातुं स्वरूपं मम ।
कोऽहं ब्रूहि महेश्वरोहं इति वा त्वं वाहमेवाम्बिके
को भेदःशिवयोः तथैव शिवदे जीवेशयोर्वा कथम् ॥ ८॥

हंसीत्वं भुवनेति शङ्करगुरोः वाक्येन जानाम्यहं
त्वामेवाम्ब ममापिदोषमखिलं कृत्वा गुणं पालय ।
हंसस्सोहमितीह मन्त्र जपतः प्रत्यक्षतो दर्शनं
त्वद्रूपस्य ममाऽपि देहि शिवदे श्रीराजराजेश्वरि ॥ ९॥

लक्ष्मीं देहि सदा ममाऽपि कृपया श्रीपाण्ड्यराजात्मजे
दोषं चाक्षुषमप्यसह्यमेव नितरां दूरीकुरुत्वं शिवे ।
लक्ष्मी वाङ्मुखदेवताभिरनिशं संस्तूयमानां परां
त्वामेवात्र समाश्रये नहि परा देवी त्रिलोक्यां खलु ॥ १०॥

ह्रीं बीजैः त्रिविधैः शिखासु घटिताः खण्डाः त्रयः शङ्करि
यस्मिन् मन्त्रवरे सचापि मनुराट् यस्याः स्वरूपं शिवे ।
ह्रीं मायेति च कथ्यते बुधवरैः या शक्तिराद्यापरा
सा त्वं देवि नमस्करोमि भवतीं देह्यात्मचक्षुः परे ॥ ११॥

सर्वे विष्णुमुखाः सुराश्च जननि त्वच्छासने संस्थिताः
तस्माद्देवि नवग्रहाः तव मते स्थित्वैव सौख्यप्रदाः ।
सत्येवं मम दुःखमेव बहुधा कुर्वन्ति सूर्योदयः
देवाः त्वत्पदपद्ममेव शरणं प्राप्तोऽस्मि मां पालय ॥ १२॥

कष्टं त्वद्भजने निवर्त्तत इति श्रुत्वा भजाम्यम्बिके
त्वामेवाद्य तथाऽपि मे नहि सुखं तत्कारणं ब्रूहि मे ।
कष्टात्कष्टपरम्परा मम गृहे संवर्धते मानदे

मातुस्ते शिशुपालनात् विमुखता नैवोचिता शाम्भवी ॥ १३॥

लाभोयं परमः महेश्वरि शिवे त्वत्पूजने यन्मनः
नित्यं वर्तत इत्यहो भगवति तत्र स्थिरं कुर्विदम् ।
लक्ष्मीं वा हरिनाभिपद्मजसखीं नित्यं वशे मे कुरु
मुख्यं मे नयनस्य पाटवमपि त्वं देहि मातः परे ॥ १४॥

ह्रीम्बीजाक्षरवासिनि शशिकले श्रीचक्र रूपेशिवे
मीनाक्षि मलयध्वजाधिपसुते श्रीसुन्दरेशप्रिये ।
ह्रीं ह्रीं ह्रीमिति मन्त्रराजमनिशं जप्त्वाऽम्बिकां त्वामहं
दृष्टुं देहि ममाद्य चक्षुरमलं त्वां पूजयाम्यन्वहम् ॥ १५॥

इति श्रीमीनाक्षी पञ्चदशी स्तोत्रं सम्पूर्णम् ।

Proofread by Rajesh Thyagarajan

*Shri Minakshi Panchadashi Stotram*

pdf was typeset on June 1, 2023

Please send corrections to *sanskrit@cheerful.com*